## कर्मव्यतिहारे णच् स्त्रियाम्। (४३/३२१७)

[1]कर्म क्रिया। व्यतिहारः [2]परस्परकरणम्। [3]कर्मव्यतिहारे गम्यमाने धातोः णच् प्रत्ययो भवति स्त्रीलिङ्गे [4]वाच्ये। [5]तच्च भावे। चकारो विशेषणार्थः 'णचः स्त्रियामञ्' (५.४.१४/३२१६) इति। व्यावक्रोशी। व्यावलेखी। [6]व्यावहासी वर्तते। स्त्रियाम् इति किम्? व्यतिपाको [7]वर्तते। बाधकविषयेऽपि क्वचिद् इष्यते, व्यावचोरी, व्यावचर्ची[8]। इह न भवति। व्यतीक्षा, व्यतीहा [9]वर्तते। व्यात्युक्षी [10]भवति। तदेतद् वैचित्र्यं कथं लभ्यते? 'कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति[11] भवति॥

## अभिविधौ भावे इनुण्। (४४/३२१८)

अभिविधिरभिव्याप्तिः, क्रियागुणाभ्यां कार्त्स्न्येन सम्बन्धः। अभिविधौ [12]गम्यमाने धातोः भावे इनुण्[13] भवति। [14]साङ्कूटिनम्। [15]सांराविणम्। सान्द्राविणं [16]वर्तते। अभिविधौ इति किम्? [17]सङ्कोटः। सन्द्रावः। संरावः। भावे इति वर्तमाने पुनर्भावग्रहणं [18]वासरूपनिरासार्थम्, तेन [19]घञ् न भवति। ल्युटा तु समावेश इष्यते। सङ्कूटनं वर्तते[20]। तत् कथम्? कृत्यल्युटो बहुलम्' (३.३.११३/२८४१) इति[21]॥

## आक्रोशेऽवन्योर्ग्रहः। (४५/३२२०)

दृष्टानुवृत्तिसामर्थ्याद्[22] घञ् अनुवर्तते, नानन्तर इनुण्। अव नि इत्येतयोः उपपदयोः ग्रहेर्धातोः घञ् प्रत्ययो भवति [23]आक्रोशे गम्यमाने। आक्रोशः [24]शपनम्। अवग्राहो हन्त ते वृषल भूयात्। [25]निग्राहो हन्त ते वृषल भूयात्। आक्रोशे इति किम्? अवग्रहः पदस्य। निग्रहश्चोरस्य॥

## प्रे लिप्सायाम्। (४६/३२२१)

ग्रहः [26]इत्येव। प्रशब्दे उपपदे ग्रहेर्धातो घञ् प्रत्ययो भवति [27]लिप्सायां गम्यमानायाम्। पात्रप्रग्राहेण चरति भिक्षुः [28]पिण्डार्थी। स्रुवप्रग्राहेण चरति [29]द्विजो दक्षिणार्थी। लिप्सायाम् इति किम्? प्रग्रहो देवदत्तस्य॥

## परौ यज्ञे। (४७/३२२२)

[30]परिशब्दे उपपदे ग्रहेः घञ् प्रत्ययो भवति, [31]यज्ञविषयश्चेत् [32]प्रत्ययान्ताभिधेयः स्यात्। उत्तरपरिग्राहः। [33]अधरपरिग्राहः। यज्ञे इति किम्? परिग्रहो देवदत्तस्य॥

---

1. कर्म नास्ति अ. ह. 2. परस्परानुकरणम् ग. 3. कर्मव्यतिहारेण ह, कर्मव्यतिहारः क्रियाव्यतिहारः फ, नास्ति ग. 4. भावे फ. ह, नास्ति ड. 5. तच्च–विशेषणार्थः [नास्ति क. ड. 6. व्यावभाषी ड. 7. दर्शने क. 8. वर्तते इति इत्यधिकम् अ. ड. फ. ह. 9. वर्तते नास्ति फ. 10. वर्तते इति च फ. ह. 11. लभ्यते अ. ब. क, नास्ति फ, बहुलवचनात् ह. 12. गम्यमाने धातोः नास्ति क. फ. ह. 13. प्रत्ययः इत्यधिकम् क.फ.ह. 14. संचाटिवम् वर्तते क, सांकुटिनम् ह, सांकोटिनं वर्तते ड. 15. सांराविणः ह. 16. वर्तते नास्ति ब. 17. संकोटः नास्ति अ. ब. क. ड. फ. ह. 18. वासरूपविधिनिरासार्थम् ब. क. ड. 19. घञन्तनपुंसके भावे क्तः न भवति फ. 20. इति इत्यधिकम् फ. 21. लभ्यते इत्यधिकम् अ. 22. अत्र इत्यधिकम् ब, अत्रापि इत्यधिकम् अ. क. ड. 23. आक्रोशे नास्ति फ. ह. 24. पतनम् ड. 25. उदाहरणमिदं नास्ति फ. ह. 26. इति वर्तते ब. 27. लिप्सायां नास्ति ह. 28. पिण्डपातार्थी ब, पिण्डपातार्थम् ड. 29. विप्रो अ. ब. क. 30. ग्रह इत्येव इत्यधिकम् अ. ब. क. ड. ह. 31. यज्ञविषये अपि प्राप्ते ह, यज्ञविषयं चेत् प्रत्ययाभिधेयं भवाते ड. 32. प्रत्ययान्तरस्य अभिधेयं भवति ब. ह. 33. अधरपरिग्राहः नास्ति फ.